पञ्चदशः पाठः
१५

# डॉ. ए.पी.जे. अब्दुलकलामः

## ( वृद्धिः, अयादिः च )



डॉ. ए.पी.जे. अब्दुलकलामवर्यः बाल्यकालाद् एव मेधावी आसीत्। सर्वे शिक्षकाः तं स्निह्यन्ति स्म। यदा कलामः द्वितीयकक्षायां पठति स्म तदा स्वकक्षां त्यक्त्वा बहिः गतः इति ज्ञात्वा तस्य शिक्षकः क्रुद्धः अभवत्।

अपरस्मिन् दिवसे सः तम् अतर्जयत् । तत्पश्चात् सः गणितविषयस्य कक्षां कदापि न त्यक्तवान् परीक्षापरिणामे च शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान् । प्रार्थनासभायामपि शिक्षकः तद् वृतान्तं सर्वेभ्यः छात्रेभ्यः श्रावितवान् पुनश्च उक्तवान् ''एषः बालकः एतस्य विद्यालयस्य महान् विद्यार्थी भविष्यति।''

पं. शिवसुब्रह्मण्य अय्यरः कलामं विज्ञानविषयं पाठयति स्म। सः ज्ञातवान् यत् कलामे असाधारणी प्रतिभा अस्ति। अनुकूलः परिवेशः मिलति चेत् सः बालकः महापुरुषः भविष्यति इति विचार्य वारं-वारं सः तं प्रेरयति वदति च ''कलाम ! अहं त्वां सुशिक्षितं महापुरुषं निर्मातुम् इच्छामि।'' सः शिक्षकः तं बहुवारं स्वगृहम् आहूय स्वेन सह पाकशालायाम् उपावेश्य भोजनं कारितवान् । सः एव अब्दुलकलामः महान् वैज्ञानिकः प्रक्षेपास्त्रजनकः राष्ट्रनायकश्च अभवत् ।

कलामवर्यस्य शिक्षाप्रदकथनानि –

१. स्वस्य प्रथमविजयात्परं कदापि विश्रामः न करणीयः यतोहि अपरस्मिन् अवसरे यदि भवान् असफलः भवेत् तर्हि पूर्वापेक्षया अधिके जनाः एतद् वक्तुं सिद्धाः स्युः यत् प्रथमविजयः केवलं भाग्याधीनः आसीत्।

२. अस्माकं सर्वेषां समीपे समाना प्रतिभा नास्ति परम् अस्माकं समीपे प्रतिभां विकासयितुं समानाः अवसराः सन्ति ।

३. स्वप्नाः ते न सन्ति यान् वयं शयानाः पश्यामः स्वप्नास्तु ते सन्ति ये अस्माकं शयने विघ्नान् कुर्वन्ति।

४. यदि भवान् सूर्यः इव प्रकाशमानः भवितुम् इच्छति तर्हि पूर्वं तद्वत् ज्वलेत् ।

५. सर्वे चटकाः वृष्टिसमये कमपि आलम्ब्य वृष्टेः जलात् स्वान् (आत्मनः) रक्षन्ति परं श्येनः मेघानाम् उपरि उड्डीय वृष्टिजलात् स्वं रक्षति।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| मेधावी | बुद्धियुक्तः | बुद्धिमान् |
| अतर्जयत् | क्रोधम् अकरोत् | फटकारा |
| स्निह्यन्ति | स्नेहं कुर्वन्ति | स्नेह करते हैं। |
| त्यक्त्वा | त्यागं कृत्वा | त्याग करके |
| अपरस्मिन् | अन्यस्मिन् | अन्य में |
| उक्तवान् | अकथयत् | कहा |
| आलम्ब्य | आलम्बनं कृत्वा | सहारा लेकर |

## अभ्यासः

१. **निम्नलिखितपदानाम् उच्चारणं कुरुत -**

अपरस्मिन्, तत्पश्चात्, वृत्तान्तम्, श्रावितवान्, उपविश्य, पूर्वापेक्षया, भाग्याधीनम्।

२. **निम्नलिखितप्रश्नान् एकवाक्येन उत्तरत -**

(क) बाल्यकालात् एव मेधावी कः आसीत्?

(ख) सर्वे शिक्षकाः कं स्निह्यन्ति स्म ?

(ग) रामकृष्णःअय्यरः कक्षायां किं पाठयति स्म?

(घ) कलामं विज्ञानविषयं कः पाठयति स्म?

(ङ) शिक्षकः कलामं कुत्र आहूय भोजनं कारितवान्?

(च) कदा विश्रामः न करणीयः ?

## ३. रेखाङ्कितपदानि आधारिकृत्य प्रश्ननिर्माणं कुरुत -

(क) परीक्षापरिणामे शतप्रतिशतम् अङ्कान् गणित विषये प्राप्तवान् ।

(ख) शिक्षकः तं स्वेन सह पाकशालायाम् उपवेश्य भोजनं कारितवान्।

(ग) अस्माकं सर्वेषां समीपे समाना प्रतिभा नास्ति ।

(घ) भवान् सूर्य इव प्रकाशमानः भवितुं इच्छति ।

(ङ) श्येनः मेघानाम् उपरि उड्डीय वृष्टिजलात् स्वं रक्षति।

## ४. विभक्तिं वचनम् च लिखत -

| | पदम् | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) | विद्यालयस्य | .................. | .................. |
| (ख) | कथनानि | .................. | .................. |
| (ग) | कलामे | .................. | .................. |
| (घ) | पाकशालायाम् | .................. | .................. |
| (ङ) | मेघानाम् | .................. | .................. |

## योग्यता-विस्तारः

### १. भारतस्य प्रमुखवैज्ञानिकाः

१. आर्यभट्टः - अयं प्रसिद्धः वैज्ञानिकः । अस्य विशुद्धवैज्ञानिकरचनायाः नाम आर्यभटीयम् अस्ति।

२. वराहमिहिरः-बृहत्संहिता अस्य प्रसिद्धा कृतिः।''वेदान् अधीत्य पञ्चाङ्गस्य परिवर्तनं विधेयम्'' इति अस्य मतम् अस्ति ।

३. जगदीशचन्द्रवसुः-अयं हि कैस्टोग्राफनामकं यन्त्रम् आविष्कृतवान् । वृक्षेषु अपि स्पन्दनादिकं भवति इति एषः उदघोषयत् ।

४. प्रो. बीरबलसहानीः-वनस्पतेः जगतः विकासस्य तत्कालीनं भूगोलस्य वातावरणविषये आविष्कारं कृतवान् ।

## २. सन्धिं जानीम -

**अयादिसन्धिः** - ए, ओ, ऐ, औ वर्णेभ्यः (स्वरेभ्यः) परं कोऽपि स्वरः ( अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ )आगच्छेत् तदा

| | | |
|---|---|---|
| ए स्थाने | = | अय् |
| ओ स्थाने | = | अव् |
| ऐ स्थाने | = | आय् |
| औ स्थाने | = | आव् भवति। |

**उदाहरणानि** -

| | | |
|---|---|---|
| ने + अनम् | = | नयनम् |
| नै + अकः | = | नायकः |
| भो + अनम् | = | भवनम् |
| पौ + अकः | = | पावकः |

**वृद्धि सन्धिः** - अवर्णस्य पश्चात् ए/ऐ द्वयोः कोऽपि वर्णः भवति तदा द्वयोः(अ + ए/ अ +ऐ) वर्णयोः स्थाने ऐकारः(ऐ) भवति। तथा च अवर्णस्य पश्चात् ओ/औ द्वयोः कोऽपि वर्णः भवति तदा द्वयोः(अ + ओ/ अ +औ) वर्णयोः स्थाने औकारः(औ) भवति।

**उदाहरणानि** -

| | | |
|---|---|---|
| सदा + एव | = | सदैव |
| महा + औषधि | = | महौषधिः |
| तण्डुल + ओदनम् | = | तण्डुलौदनम् |



**डॉ. राजेन्द्रप्रसादः भारतस्य प्रथमः राष्ट्रपतिः**